# Devaih Kritam 05 Devi Stotram

# देवैः कृतं ५ देवीस्तोत्रम्

## Document Information

Text title : Devaih Kritam 05 Devi Stotram

File name : devaiHkRRitaM05devIstotram.itx

Category : devii, devI, skandapurANa, stotra

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : skandapurANa | prabhAsakhaNDa | arbudakhaNDa | adhyAya 36/31-35||

Latest update : September 6, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 6, 2025

*sanskritdocuments.org*

# देवैः कृतं ५ देवीस्तोत्रम्

देवा ऊचुः ।
नमस्ते देवदेवेशि नमस्ते काञ्चनप्रभे ।
नमस्ते पद्मपत्राक्षि नमस्ते जगदम्बिके ॥ ३१॥

नमस्ते विश्वरूपे च नमस्ते विश्वसंस्तुते ।
त्वं मतिस्त्वं धृतिः कान्तिस्त्वं सुधा त्वं विभावरी ॥ ३२॥

क्षमा ऋद्धिः प्रभा स्वाहा सावित्री कमला सती ।
त्वं गौरी त्वं महामाया चामुण्डा त्वं सरस्वती ॥ ३३॥

भैरवी भीषणाकारा चण्डमुण्डासिधारिणी ।
भूतप्रिया महाकाया घटाली विक्रमोत्कटा ॥ ३४॥

मद्यमांसप्रिया नित्यं भक्तत्राणपरायणा ।
त्वया व्याप्तमिदं सर्वं त्रैलोक्यं सचराचरम् ॥ ३५॥

इति श्रीस्कन्दपुराणे प्रभासखण्डे अर्बुदखण्डे षट्त्रिंशाध्यायान्तर्गतं
देवैः कृतं देवीस्तोत्रं समाप्तम् ।

स्कन्दपुराण । प्रभासखण्ड । अर्बुदखण्ड । अध्याय ३६/३१-३५॥

skandapurANa . prabhAsakhaNDa . arbudakhaNDa . adhyAya 36/31-35..

Proofread by PSA Easwaran

Please send corrections to *sanskrit@cheerful.com*